॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय ६५

अनेकशतसाहस्रीं विषण्णां हरिवाहिनीम् ।
जाम्बवान्समुदीक्ष्यैवं हनुमन्तमथाब्रवीत् ॥ १॥

वीर वानरलोकस्य सर्वशास्त्रमथाब्रवीत् ।
तूष्णीमेकान्तमाश्रित्य हनुमन्किं न जल्पसि ॥ २॥

हनुमन्हरिराजस्य सुग्रीवस्य समो ह्यसि ।
रामलक्ष्मणयोश्चापि तेजसा च बलेन च ॥ ३॥

अरिष्टनेमिनः पुत्रौ वैनतेयो महाबलः ।
गरुत्मानिव विख्यात उत्तमः सर्वपक्षिणाम् ॥ ४॥

बहुशो हि मया दृष्टः सागरे स महाबलः ।
भुजगानुद्धरन्पक्षी महावेगो महायशाः ॥ ५॥

पक्षयोर्यद्बलं तस्य तावद्भुजबलं तव ।
विक्रमश्चापि वेगश्च न ते तेनापहीयते ॥ ६॥

बलं बुद्धिश्च तेजश्च सत्त्वं च हरिसत्तम ।
विशिष्टं सर्वभूतेषु किमात्मानं न बुध्यसे ॥ ७॥

अप्सराप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला ।
अञ्जनेति परिख्याता पत्नी केसरिणो हरेः ॥ ८॥

अभिशापादभूत्तात वानरी कामरूपिणी ।
दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः ॥ ९॥

कपित्वे चारुसर्वाङ्गी कदा चित्कामरूपिणी ।
मानुषं विग्रहं कृत्वा यौवनोत्तमशालिनी ॥ १०॥

अचरत्पर्वतस्याग्रे प्रावृडम्बुदसंनिभे ।
विचित्रमाल्याभरणा महार्हक्षौमवासिनी ॥ ११॥

तस्या वस्त्रं विशालाक्ष्याः पीतं रक्तदशं शुभम् ।
स्थितायाः पर्वतस्याग्रे मारुतोऽपहरच्छनैः ॥ १२॥

स ददर्श ततस्तस्या वृत्तावूरू सुसंहतौ ।
स्तनौ च पीनौ सहितौ सुजातं चारु चाननम् ॥ १३॥

तां विशालायतश्रोणीं तनुमध्यां यशस्विनीम् ।
दृष्ट्वैव शुभसर्वाग्नीं पवनः काममोहितः ॥ १४॥

स तां भुजाभ्यां पीनाभ्यां पर्यष्वजत मारुतः ।
मन्मथाविष्टसर्वाङ्गो गतात्मा तामनिन्दिताम् ॥ १५॥

सा तु तत्रैव सम्भ्रान्ता सुवृत्ता वाक्यमब्रवीत् ।
एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ १६॥

अञ्जनाया वचः श्रुत्वा मारुतः प्रत्यभाषत ।
न त्वां हिंसामि सुश्रोणि मा भूत्ते सुभगे भयम् ॥ १७॥

मनसास्मि गतो यत्त्वां परिष्वज्य यशस्विनि ।
वीर्यवान्बुद्धिसम्पन्नः पुत्रस्तव भविष्यति ॥ १८॥

अभ्युत्थितं ततः सूर्यं बालो दृष्ट्वा महावने ।
फलं चेति जिघृक्षुस्त्वमुत्प्लुत्याभ्यपतो दिवम् ॥ १९॥

शतानि त्रीणि गत्वाथ योजनानां महाकपे ।
तेजसा तस्य निर्धूतो न विषादं ततो गतः ॥ २०॥

तावदापततस्तूर्णमन्तरिक्षं महाकपे ।
क्षिप्तमिन्द्रेण ते वज्रं क्रोधाविष्टेन धीमता ॥ २१॥

ततः शैलाग्रशिखरे वामो हनुरभज्यत ।
ततो हि नामधेयं ते हनुमानिति कीर्त्यते ॥ २२॥

ततस्त्वां निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम् ।
त्रैलोक्ये भृशसङ्क्रुद्धो न ववौ वै प्रभञ्जनः ॥ २३॥

सम्भ्रान्ताश्च सुराः सर्वे त्रैलोक्ये क्षुभिते सति ।
प्रसादयन्ति सङ्क्रुद्धं मारुतं भुवनेश्वराः ॥ २४॥

प्रसादिते च पवने ब्रह्मा तुभ्यं वरं ददौ ।
अशस्त्रवध्यतां तात समरे सत्यविक्रम ॥ २५॥

वज्रस्य च निपातेन विरुजं त्वां समीक्ष्य च ।

सहस्रनेत्रः प्रीतात्मा ददौ ते वरमुत्तमम् ॥ २६ ॥

स्वच्छन्दतश्च मरणं ते भूयादिति वै प्रभो ।
स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः ॥ २७ ॥

मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः ।
त्वं हि वायुसुतो वत्स प्लवने चापि तत्समः ॥ २८ ॥

वयमद्य गतप्राणा भवानस्मासु साम्प्रतम् ।
दाक्ष्यविक्रमसम्पन्नः पक्षिराज इवापरः ॥ २९ ॥

त्रिविक्रमे मया तात सशैलवनकानना ।
त्रिः सप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम् ॥ ३० ॥

तदा चौषधयोऽस्माभिः सञ्चिता देवशासनात् ।
निष्पन्नममृतं याभिस्तदासीन्नो महद्बलम् ॥ ३१ ॥

स इदानीमहं वृद्धः परिहीनपराक्रमः ।
साम्प्रतं कालमस्माकं भवान्सर्वगुणान्वितः ॥ ३२ ॥

तद्विजृम्भस्व विक्रान्तः प्लवताम् उत्तमो ह्यसि ।
त्वद्वीर्यं द्रष्टुकामेयं सर्वा वानरवाहिनी ॥ ३३ ॥

उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवम् ।
परा हि सर्वभूतानां हनुमन्या गतिस्तव ॥ ३४ ॥

विषाण्णा हरयः सर्वे हनुमन्किमुपेक्षसे ।
विक्रमस्व महावेगो विष्णुस्त्रीन्विक्रमानिव ॥ ३५ ॥

ततस्तु वै जाम्बवताभिचोदितः
प्रतीतवेगः पवनात्मजः कपिः ।
प्रहर्षयंस्तां हरिवीर वाहिनीं
चकार रूपं महदात्मनस्तदा ॥ ३६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com